

# केन्द्रीयसंस्कृतविश्वविद्यालयः

कार्यक्रमप्रकाशनविभागः-, मुख्यालयः , नवदेहली





## अखिलभारतीयरूपकमहोत्सवस्य प्रतिवेदनम्



**माघशुक्लद्वादशीतः माघशुक्लचतुर्दशी**

02/02/2023 तः 04/02/2023



**प्रतिवेदननिर्माणम्**

1. **डा मधुकेश्वरभट्टः**, निदेशकः, कार्यक्रम-प्रकाशनविभागः, मुख्यालयः, नवदेहली
2. **डा गणेश ति. पण्डितः**, सहनिदेशकः, कार्यक्रम-प्रकाशनविभागः, मुख्यालयः, नवदेहली
3. **डा. बिपिनकुमारझाः**, सहायकाचार्यः, कार्यक्रम-प्रकाशनविभागः, मुख्यालयः, नवदेहली

# अखिलभारतीयरूपकमहोत्सवः

02/02/2023 तः 04/02/2023

अथ अभिनवशैल्या व्यापकरूपेण च अखिलभारतीयरूपकमहोत्सवं केन्द्रीयसंस्कृतविश्वविद्यालयः पुरीस्थे




श्रीसदाशिवपरिसरे समायोजयत्। माघशुक्लद्वादशीतः माघशुक्लचतुर्दशीं यावत् (02/02/23 तः 04/02/2023 पर्यन्तम्) पुरीपत्तनस्थे पौरसदने दिनत्रयं च प्रवृत्ते अस्मिन् रूपकमहोत्सवे नवपरिसरीयाः त्रयः आदर्शमहाविद्यालयीयाश्च छात्राः सोत्साहं भागमूढ्वा स्वीयां नवरसाभिनयचातुरीं रङ्गमञ्चे प्रादर्शयन् । अस्य महोत्सवस्य उद्घाटनसमारोहः माघशुक्लद्वादश्यां तिथौ प्रातः एकादशवादने समजनि। समुद्घाटकरूपेण मुख्यातिथिरूपेण च उज्जैनस्थस्य महर्षिसान्दीपनि-राष्ट्रियवेदविद्याप्रतिष्ठानस्य उपाध्यक्षाः आचार्याः प्रफुल्लकुमारमिश्रवर्याः समागताः आसन्। उद्घाटनभाषणे तैः उक्तं यत् संस्कृतरूपकाणि सामाजिकसन्देशैः लोकोपदेशैः विविधैः नैतिकैः मानवीयैश्च मूल्यैः समृद्धानि सन्ति। एतादृशैः महोत्सवैः तेषां प्रसारः शक्यः इति। विश्वविद्यालयस्य कुलपतयः आचार्य श्रीनिवास वरखेडी वर्याः उद्घाटनसमारोहे अन्तर्जालमुखेन (Online) परोक्षं च उपस्थिताः आसन् । श्रीसदाशिवपरिसरस्य निदेशकाः



आचार्य खगेश्वर मिश्रवर्याः सर्वान् पुष्पगुच्छैः सत्कृतवन्तः । भारतस्य विभिन्नैः प्रान्तैः परिसरैः आदर्शमहा-विद्यालयैः उच्चशिक्षासंस्थाभिः सामाजिकसङ्घटनैश्च समागताः अधिकारिणः निदेशकाः आचार्याः मार्गदर्शकाः प्रेक्षकाः सहस्रशः छात्राश्च उद्घाटनसमारोहस्य साक्षिणः अभवन्। विश्वविद्यालयस्य विविधविद्यास्थानानाम्। अधिष्ठातारः अपि विशेषरूपेण



समुपस्थिताः आसन्। उद्घाटनसमारोहात् समनन्तरमेव श्री सदाशिवपरिसरीयैः कुशीलवैः छात्रैः पूर्वरङ्गम् उपस्थापितम् । सर्वगणानां रूपकणिकाः सङ्ग्रहेण रङ्गमञ्चे तैः अभिनीय दर्शिताः। ततः जगन्नाटकसूत्रधारस्य लीलावतारप्रधानानि रूपकाणि जगन्नाथस्य क्षेत्रे समारब्धानि । रूपकस्पर्धायां सर्वादौ कालिकट आदर्शसंस्कृतविद्यापीठस्य छात्राः **बालचरितम्** इत्येतत् रूपकं सुन्दरतया अभिनीय सर्वान् तोषयन् । बालचरितमित्येतस्मिन् रूपके श्रीकृष्णस्य बाल्यलीलाः अद्भुतरीत्या छात्रैः प्रदर्शिताः । श्रीकृष्णस्य लीलाः नृत्यमाध्यमेन सुन्दरतया च संस्कृतच्छात्रैः प्रस्तुताः इत्यतः प्रेक्षकाः दर्शं दर्शं पुलकिताः समभवन् । तदग्रे हिमाचलप्रदेशस्थस्य सनातन धर्म-आदर्शसंस्कृतमहाविद्यालयस्य छात्राः **महावीरचरितम्** इत्येतत् रूपकम् अभिनीय सर्वान् तोषितवन्तः । रामलक्ष्मणपात्रधारिणौ दर्शकप्रियौ संवृत्तौ। प्रथमवारं रूपकमहोत्सवे प्रविष्टानां आदर्श-महाविद्यालयीयानां छात्राणां कलाकौशलं श्लाघ्यमिति सर्वैः प्रेक्षकैः एककण्ठेन प्रोक्तम् । सायङ्काले मध्यप्रदेशराज्यात् समागतैः भोपालपरिसरच्छात्रैः **वृषभानुजा** इति नाटिका आकर्षकशैल्या प्रस्तुतीकृता। रङ्गमञ्चसज्जीकरणे प्रकाशव्यवस्थायाम् आहार्यादिषु च नावीन्यम् अस्यां नाटिकायामासीत् । नृत्यवैभवं साद्यन्तमासीत् । दिनस्य अन्तिमायां रूपकस्पर्धायां शृङ्गगिरिपरिसरच्छात्राः **कंसवधः** इतीदं रूपकं मनोज्ञया शैल्या प्रस्तीतकृतवन्तः । अमीषाम् आङ्गिकः वाचिकः आहार्यः सात्त्विकश्चेति चतुर्विधोऽपि अभिनयः प्रेक्षकेभ्यः भृशमरोचत। कंसस्य पात्रं कृष्णस्य च पात्रं समेषां प्रशंसापात्रमभूत् । एवं चतुर्भिः गणैः चत्वारि रूपकाणि प्रथमदिने स्पर्धाव्याजेन सुष्ठु प्रदर्शितानि। प्रेक्षकैः पूर्णमासीत् पुरीस्थं पौरसदनम् ।

# द्वितीयदिनम्

## (०२/०२/२०२३)

**द्वितीयदिनस्य स्पर्धाः**

द्वितीयदिने गुरुवासरे प्रातः सर्वादौ पश्चिमबङ्गालराज्यस्थस्य कालिआचक बिक्रम किशोर आदर्शसंस्कृतमहाविद्यालयस्य अभिनयनिपुणाः छात्राः **'ललितमाधवम्'** इतीदं रूपकं सुष्ठु प्रस्तुतीकृतवन्तः। प्रेक्षकाणां चित्ताकर्षणे **'ललितमाधवम्'**



सफलं संवृत्तम्। एते प्रथमवारम् अखिलभारतीयरूपकस्पर्धार्थं चिताः सन्तः स्वीयया अभिनयकलया सर्वान् तोषितवन्तः । रङ्गसज्जा वेषभूषा मनोहारिणी चासीत् । तदग्रे उत्तरप्रदेशराज्यस्य लक्ष्मणपुरात् समागताः लखनऊ परिसरच्छात्राः भट्टनारायणविरचितं **वेणीसंहारः** इतीदं वीररसप्रधानं रूपकं सुष्ठु प्रादर्शयन् । अपराह्ने राजस्थानराज्यात् समागताः जयपुरपरिसरच्छात्राः **बालचरितम्** इत्येतत् रूपकं सुन्दरतया अभिनीय सर्वान् नन्दितवन्तः। पात्रानुकूलकरीं वेषभूषां दर्शं दर्शं प्रेक्षकाः नितान्तम् अमोदन्त। ततः सायं हिमाचलप्रदेशात् समागताः वेदव्यासपरिसरच्छात्राः **श्रीकृष्णभक्तिचन्द्रिका** इत्येतत् रूपकं ससन्तोषम् अभिनीय सर्वेषां मनांसि रञ्जितवन्तः। ततः जम्मूस्थ -श्री रणबीरपरिसरच्छात्राः भवभूतेः **उत्तररामचरितम्** इतीदं नाटकम् अतीव रमणीयतया प्रादर्शयन् । छायासीतायाः चित्रणं रङ्गमञ्चे सुष्ठु कृतम्। किञ्च करुणरसप्रधानस्य अस्य नाटकस्य प्रस्तुतिः सर्वेषां मोदाय अकल्पत। संस्कृतनाटकेषु अतीव प्रसिद्धं नाटकं प्रदर्श्य परिसरच्छात्राः सर्वेषां प्रशंसाभाजः समभवन् । दिनान्तिमस्पर्धायां केरलराज्यस्य गुरुवायूरुपरिसरच्छात्राः **'सुभद्राधनञ्जयम्'** इतीदं रूपकं प्रादर्शयन् । केरलराज्यात् समागतानां विश्वविद्यालयस्य परिसरच्छात्राणाम् अभिनयकलां संवीक्ष्य समुपस्थिताः सहस्राधिकाः प्रेक्षकाः मुग्धाः समभवन् । प्रकाशव्यवस्थायां रङ्गमञ्चसज्जीकरणे आहार्यादिषु च परिणताः सन्ति केरलपरिसरच्छात्राः इति सर्वैः प्रेक्षकैः एककण्ठेन

उक्तम्। विश्वविद्यालयस्य कुलपतयः आचार्य श्रीनिवास वरखेडी वर्याः अद्य अखिलभारतीयरूपकमहोत्सवस्य रूपकाणि प्रत्यक्षं संवीक्ष्य छात्रान् सर्वान् प्रोत्साहितवन्तः। कुलपतिभिः सह आचार्य प्रफुल्लकुमारमिश्रवर्याः आचार्य अभिराजराजेन्द्रमिश्रवर्याः परिसरनिदेशकाः आचार्य खगेश्वरमिश्रवर्याः अन्ये विविधविद्यास्थानानाम् अधिष्ठातारः उपस्थिताः आसन्। पुरीमागम्य कुलपतयः सर्वादौ सदाशिवपरिसरस्य विविधानि प्रगतिपरकार्याणि दृष्ट्वा धनात्मकं प्रतिपुष्टिं स्वीकृतवन्तः।









# तृतीयदिनम्
## (04/02/2023)

तृतीये दिने प्रातः विश्वविद्यालयस्य कुलपतयः आदौ परिसरस्य नूतनतया निर्मितं मुखद्वारं समुदघाटयन् । परिसरनिदेशकाः खगेश्वरमिश्रप्रभृतयः वरिष्ठाः अन्ये आचार्याः अधिकारिणश्च सहयोगमकुर्वन् । ततः द्वितीयदिनस्य स्पर्धाः निर्धारितसमयसारण्यनुसारमेव पौरसदने प्रारब्धाः ।

**तृतीययदिनस्य स्पर्धाः**



आदौ त्रिपुराराज्यस्य अगरतलास्थात् एकलव्यपरिसरात् समागताः छात्राः विख्यातविजयम् इतीदं रूपकं प्रदर्श्य सर्वान् रसिकान् रञ्जितवन्तः । ततः अन्तिमप्रस्तुतिः आतिथेयस्य परिसरस्य अर्थात् सदाशिवपरिसरस्य आसीत्। स्थानीयाः छात्राः स्वीयां अनितरसाधारणीं प्रतिभां रङ्गमञ्चे प्रदर्श्य सर्वान् सभ्यान् आनन्दितवन्तः ।




सदाशिवपरिसरच्छात्राणां अभिनयकलां संवीक्ष्य प्रेक्षकाः अमन्दमानन्दमन्वभवन् । एवं द्वादशैः गणैः प्रदर्शितानि रूपकाणि अत्यन्तं सुन्दराणि प्रेक्षकाणां चित्ताकर्षणक्षमाणि चासन् ।

# अखिलभारतीयरूपकमहोत्सवाङ्गतया आयोजितायाः राष्ट्रस्तरीयरूपकस्पर्धायाः नियमाः निर्णायकाः फलितांशाश्च ।

अखिलभारतीयरूपकमहोत्सवात् प्राक् भारतस्य चतुर्षु स्थानेषु वलयस्तररूपकमहोत्सवस्य समायोजनाय सर्वादौ सर्वसम्मतः निर्णयः विश्वविद्यालयस्य माननीयैः कुलपतिभिः स्वीकृतः। तदनु दिसम्बर मासे (२०२२) चतुर्षु परिसरेषु पार्थक्येन वलयस्तररूपकमहोत्सवः सवैभवं समायोजितः। एतेषु वलयेषु द्वादश परिसरीयाः द्वाविंशः आदर्श-




महाविद्यालयीयाश्च छात्राः विभिन्नानि मनोहराणि च रूपकाणि प्रादर्शयन्। वलयस्तररूपकमहोत्सवे चिताः द्वादशादित्योपमाः द्वादशः गणाः अखिलभारतीयरूपकमहोत्सवार्थं चिताः आसन्। एकैकस्मिन् गणे अष्टादशः छात्राः एव अभिनेतृरूपेण भागं वोढुम् अवसरः कल्पितः आसीत्। सर्वेऽपि छात्राः सोत्साहम् अभिनीय विविधविशिष्टपुरस्कारान् अवाप्नुवन्। अस्मिन् वर्षे अखिलभारतीयरूपकमहोत्सवे गणपञ्चकं पञ्च पुरस्कारान् अवाप्नोत् । प्रथमः पुरस्कारः एकेन गणेन प्राप्तः द्वितीयतृतीयपुरस्कारौ क्रमशः गणद्वयेन प्राप्तौ। पुनः विशिष्टपुरस्कारः गणद्वयेन प्राप्तः । एवं सप्त गणाः पुरस्कृताः । विशिष्टपुरस्कारद्वयम् अपि इदम्प्रथमतया समागताभ्याम् आदर्शसंस्कृतमहाविद्यालयाभ्यां प्राप्तम्। यथा –

# अखिलभारतीयरूपकमहोत्सवस्य फलितांशः

| क्रमः | परिसरः | रूपकम् | पुरस्कारः |
|---|---|---|---|
| 1 | श्री सदाशिवपरिसरः पुरी , उत्कलराज्यम् | कृष्णकुतूहलम् | प्रथमपुरस्कारः |
| 2 | जयपुरपरिसरः , जयपुरम् , राजस्थानराज्यम् | बालचरितम् | द्वितीयपुरस्कारः |
| 3 | गुरुवायूरुपरिसरः , त्रिशूर , केरलराज्यम् | सुभद्राधनञ्जयम् | |
| 4 | राजीवगान्धीपरिसरः,शृङ्गेरी , कर्णाटकराज्यम् | कंसवधः | तृतीयपुरस्कारः |
| 5 | वेदव्यासपरिसरः , बलहार, हिमाचलप्रदेशः | कृष्णभक्तिचन्द्रिका | |
| 6 | सनातन धर्म आदर्शसंस्कृतमहाविद्यालयः , डोग्री , हिमाचलप्रदेशः | महावीरचरितम् | विशिष्टपुरस्कारः |
| 7 | कालिकट आदर्शसंस्कृतविद्यापीठम् बालूशेरी , केरलराज्यम् | बालचरितम् | |

न केवलम् एते एव पुरस्काराः अपि तु एकादशः विशिष्टाः पुरस्काराः एक्दशसु विभागेषु उद्घोषिताः ।

ते च पुरस्काराः यथा –

| क्रमः | छात्रः | परिसरः |
|---|---|---|
| 1 |  **सर्वोत्तमः अभिनेता-निखिल तिवारी** | भोपालपरिसरः, वृषभानुजानाटिका (कृष्णः) |
| 2 |  **सर्वोत्तमा अभिनेत्री –मोना राठौर** | जयपुरपरिसरः, बालचरितम् (देवकी) |
| 3 |  **सर्वोत्तमपोषकनटः- सुधांशु बडोन** | लखनऊपरिसरः-वेणीसंहारः (अश्वत्थामा) |
| 4 |  **सर्वोत्तमपोषकनटी देव श्री गोल** | कालियाचक-आदर्शमहाविद्यालयः, ललितमाधवम् (सत्यभामा) |
| 5 |  **सर्वोत्तमहास्यनटः कुशाग्रः** | वेदव्यासपरिसरः, बलाहरः (हि. प्र,), कृष्णभक्तिचन्द्रिका (सखा) |

१. सर्वोत्तमः अभिनेता – निखिल तिवारी, भोपालपरिसरः, वृषभानुजानाटिका (कृष्णः)

२. सर्वोत्तमा अभिनेत्री - मोना राठौर, जयपुरपरिसरः, बालचरितम् (देवकी)

३. सर्वोत्तम - आहार्यम् -गुरुवायूरपरिसरः, गुरुवायूरः, केरलम्, सुभद्राधनंजयम्

४. सर्वोत्तमनिर्देशनम् - श्री सदाशिवपरिसरः पुरी, उत्कलराज्यम्, कृष्णकुतूहलम्

५. सर्वोत्तमरङ्गसज्जा - कालिकट आदर्शसंस्कृतविद्यापीठम्, बालूशेरी , केरलराज्यम् बालचरितम्

६. सर्वोत्तमसङ्गीतसंयोजनम् - वेदव्यासपरिसरः , बलहार, हिमाचलप्रदेशः-कृष्णभक्तिचन्द्रिका

७. सर्वोत्तमप्रकाशव्यवस्था - जयपुरपरिसरः , जयपुरम् , राजस्थानराज्यम्-बालचरितम्

८. सर्वोत्तमपोषकनटः – सुधांशु बडोन, लखनऊपरिसरः-वेणीसंहारः (अश्वत्थामा)

९. सर्वोत्तमपोषकनटी – देव श्री गोल, कालियाचक आदर्शमहाविद्यालयः, ललितमाधवम् (सत्यभामा)

१०. सर्वोत्तमहास्यनटः – कुशाग्रः, वेदव्यासपरिसरः, बलाहरः (हि.प्र,), कृष्णभक्तिचन्द्रका (सखा)

११. पात्रसमन्वयः ( समग्रगणाय ) - सनातन धर्म आदर्शसंस्कृतमहाविद्यालयः , डोग्री , हिमाचलप्रदेशः

## अखिलभारतीयरूपकमहोत्सवस्य निर्णायकाः

अखिलभारतीयरूपकमहोत्सवस्य उपलक्ष्ये समायोजितायां स्पर्धायां निर्णयप्रदानाय नाट्यशास्त्रकोविदाः भारतस्य लब्धप्रतिष्ठाः विद्वांसः विश्वविद्यालयेन आकारिताः आसन्। ते च यथा –

१. प्रो बलदेवानन्दसागरः , नवदेहली

२. प्रो पि. के .माधवन् , केरलम्

३. प्रो श्रीकान्त भालुकर , महाराष्ट्रम्

४. डा शुक्ला मुखर्जी , पश्चिमबङ्गालम्

५. डा उमेश नैपाल , राजस्थानम्

६. विदुषी कलै वाणी राजमोहन, नवदेहली, ( स्पर्धा निरीक्षिका )

# सम्पूर्तिसमारोहः
04/02/2023

अखिलभारतीयरूपकमहोत्सवस्य सम्पूर्तिसमारोहः माघशुक्लचतुर्दश्यां तिथौ मध्याह्नात् आसायं (०३.३०) समजनि। मुख्यातिथिरूपेण नवदेहलीस्थ सङ्गीत-नाटक अकादमी इत्येतस्य अध्यक्षा **डा सन्ध्या पुरेचा** समागम्य सङ्गीतस्य नाटकस्य च महत्त्वं सोदाहरणं निरूपितवती। डाँ सन्ध्या पुरेचा महोदयायाः भणितयः - ' भारतीयसंस्कृतिः अखण्डिता अस्ति। सा विकृतिं न गच्छति। केन्द्रीयसंस्कृतविश्वविद्यालयस्य संस्कृतेः संस्कृतस्य च रक्षणे प्रसारे च प्रधानं पात्रम् अस्ति। तादृशकार्येषु नाटकस्पर्धाः उत्सवाः च प्रधानाः। किञ्च

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**

**नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।**




(No Wisdom, No Craftsmanship, No Knowledge of Subject, No Arts, No Yoga, No Work which is not seen in Dance (Natya). इति नाट्यशास्त्रे उक्तमस्ति। संस्कृतरूपकाणां प्रचारः विधेयः । तेन भारतीयसंस्कृतेः रक्षणमपि भविष्यति ' इति।

अस्मिन् समारोहे सारस्वतातिथिरूपेण समागताः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचराः आचार्य अभिराजराजेन्द्रमिश्रवर्याः रूपकाणां महत्त्वम् उत्सवायोजनपरम्परां च उपावर्णयन्। तेषां वचांसि यथा - " संस्कृतम् अस्माकं राष्ट्रभाषा अस्ति। संस्कृतनाटकेषु महाकाव्येषु च सङ्क्षिप्तं भारतं दृष्टुं शक्नुमः। संस्कृतरूपकाणि विश्वविद्यालयस्य छात्राः सुष्ठु अभिनयन्ति । सर्वेभ्यः शुभाशयाः " इति। सम्पूर्तिसमारोहस्य आध्यक्ष्यं कुलपतिभिः निरूढम्। तैः आतिथेयपरिसरस्य कृते शुभाशयाः अभिनन्दनानि च वितीर्णानि। **कुलपतेर्वाक् -** " नाटकं रसमयं भवेत्। नवरसाः अपि भगवतः लीलायां समाहिताः सन्ति। ' रसो वै सः 'इति वेदवचः। रसरूपस्य जगन्नाथस्य धाम्नि अयम्

अखिलभारतीयरूपकमहोत्सवः सवैभवं सम्पन्नः। मिश्रितभाषासु प्रादेशिकभाषासु च रूपकाणि काले छात्रैः प्रदर्शनीयानि। तदैव




सकलभाषाणां जननी संस्कृतभाषा इति साम्प्रतिकः लोकोऽपि स्वीकरोति। भाविनि रूपकेषु भाषासङ्गमः दृश्येत। किञ्च मया पुरस्कारः प्राप्तः। परमधिकारपदे स्थित्वा संस्कृतच्छात्रेभ्यः अहम् अधुना सविश्वासं अधिकाधिकपुरस्कारान् प्रदातुं यतिष्ये । सर्वेषां जगन्नाटकसूत्रधारः शं तनोतु "इति। निदेशकाः **प्रो. खगेश्वर मिश्रवर्याः** स्वागतश्लोकैः सर्वेषाम् अभ्यागतानां स्वागतमकुर्वन्। **आचार्य अतुलकुमारनन्दवर्याः** धन्यवादान् समार्पयन् । रूपकमहोत्सवस्य स्थानीयाः संयोजकाः **डा धर्मेन्द्र कुमार सिंग्** देववर्याः सम्पूर्तिसमारोहस्य सञ्चालनमकुर्वन्। राष्ट्रियसंयोजकाः **डा. मधुकेश्वरभट्टवर्याः** सगणाः सर्वविधव्यवस्थाम् अकल्पयन् । विविधविद्यास्थानानाम् अधिष्ठातारः सभामुखं अभ्यागतैः सत्कृताः। विविधगणानां मार्गदर्शकाः अपि बाल्यकाले नाटकादिषु नाधिकः सभामुखं सत्कृताः । सहस्राधिकाः आचार्याः, शिष्याः, प्रेक्षकाः, नागरिकाश्च सम्पूर्तिसमारोहस्य साक्षिणः अभवन्। सहस्राधिकाः सभ्याः दिनत्रयं महोत्सवे उपस्थाय सर्वान्अभिप्रेरितवन्तः । पञ्चसहस्राधिकाः वीक्षकाः प्रतिनित्यं YouTube माध्यमेन इतरे Facebook, Twitter माध्यमैः रूपकाणि अक्षिसात्कृतवन्तः । मुख्यालयात् **डा. अजयकुमारमिश्रवर्याः** प्रतिक्षणं महोत्सवस्य समसामयिकं वृत्तं सामाजिकमाध्यमेषु प्रसारयन्तः आसन्। विश्वविद्यालयस्य मुख्यालयस्थवित्तविभागात् **श्री अनिल नौटियाल, डा. लोकेश गुप्ता वर्यौ** पुर्यां स्थित्वा साहाय्यम् अकुरुताम्। ICT Cell , Central Schemes, Program and Publication इत्यादीनां विविधविभागानाम् अधिकारिणः सदस्याश्च प्रत्यक्षरूपेण परोक्षरूपेण च साहाय्यमकुर्वन् ।

डा. गणेश ति. पण्डितवर्याः, डा. बिपिन कुमार झा वर्याश्च कार्यक्रमनिर्वहणदृष्ट्या साद्यन्तं पुर्यां स्थित्वा निदेशकानां मधुकेश्वरभट्टानां मार्गदर्शने कार्यमकुरुताम्। सदाशिवपरिसरस्य सर्वेऽपि आचार्याः, सहाचार्याः, सहायकाचार्याः, शताधिकाः छात्राः च महोत्सवेन सम्बद्धेषु विविधदायित्त्वेषु आत्मानं नियोज्य अहर्निशं संस्कृतसेवां कारं कारं महोत्सवमेनं सफलीकृतवन्तः।

# व्ययविवरणिका

| क्रमः | परिसरविवरणम् | स्वीकृतराशिः | कुलराशिः |
|---|---|---|---|
| 1 | सिद्धतानिमित्तम् सप्तपरिसरेभ्यः एकादशमहाविद्यालयेभ्यश्च | 30,000 प्रतिपरिसर/आदर्शमहाविद्यालयाय (18) | 540000 |
| 2 | आयोजनादिनिमित्तम् चतुर्वलयेभ्यः | 3,30,000 प्रतिपरिसरम् (4) | 1320000 |
| 3 | एकलव्यपरिसराय (द्विवारम्) | 322400X2 | 644800 |
| 4 | पुरीपरिसराय | 53,26,000 | 5326000 |
| 5 | चयनित परिसरेभ्यः आदर्शेभ्यश्च | 1,00,000 प्रतिपरिसरम् /आदर्शमहाविद्यालयेभ्यः+50,000 पुरीपरिसरायातिरिक्तम् | 1250000 |
| | | **Total** | **9080800** |